रनङ्गीकारात्। "नन्वेवमपि तत्त्वज्ञानादेकमुक्तौ सर्व्वमुक्तिः स्यात् अविद्याया एकत्वेनैतन्निवृत्तौ क्वचिदपि संसारायोगादिति चेन्न इष्टापत्तेरित्येके। अपरे त्वेतद्दोषपरीहारायैव "इन्द्रोमायाभिरिति" बहुवचनश्रुत्यनुगृहीतमविद्यानानात्वमङ्गीकर्त्तव्यमित्याहुः। अन्ये त्वेकैवाविद्या तस्यास्त्वविद्याया जीवभेदेन ब्रह्मस्वरूपावरणशक्तयो नाना तथा च यस्य ब्रह्मज्ञानं तस्य ब्रह्मस्वरूपावरणशक्तिविशिष्टाविद्यानाशः तदन्यं प्रति ब्रह्मस्वरूपावरणशक्तिविशिष्टाविद्यानाश इत्यभ्युपगमान्नैकमुक्तौ सर्वमुक्तिः। अतएव "यावदधिकारमवस्थितिराधिकारिकाणाम्" इत्यस्मिन्नधिकरणे अधिकारिपुरुषाणामुत्पन्नतत्त्वज्ञानानामिन्द्रादीनां देहधारणानुपपत्तिमाशङ्क्य अधिकारापादकप्रारब्धकर्म्मसमाप्त्यनन्तरं विदेहकैवल्यमिति सिद्धान्तितम्। तदुक्तमाचार्य्यवाचस्पतिमिश्रैः "उपासनादिसंसिद्धितोषितेश्वरचोदितम्। अधिकारं समाप्यैते प्रविशन्ति परम्पदमिति"। एतच्चैकमुक्तौ सर्व्वमुक्तिरिति पक्षे नोपपद्यते। तस्मादेकाविद्यापक्षेऽपि प्रतिजीवमावरणभेदोपगमेन व्यवस्थोपपादनीया"।

शा० सू० भाष्ययोश्च जाततत्त्वज्ञानानामपि यावत् प्रारब्धकर्मसमाप्तिस्तावद्देहादिसम्बन्धः समर्थितो यथा "यावदधिकारमवस्थितिराधिकारिकाणाम्" ३।३।३२ सू०। "विदुषो वर्त्तमानदेहपातानन्तरं देहान्तरमुत्पद्यते न वेति चिन्त्यते। ननु विद्यायाः साधनभूतायाः सम्पत्तौ कैवल्यनिर्वृत्तिः स्यान्न वेति नेयं चिन्तोपपद्यते। न हि पाकसाधनसम्पत्तावोदनो भवेत् न वेति चिन्ता सम्भवति, नापि भुञ्जानस्तृप्येत् न वेति चिन्त्यते। उपपन्ना त्वियं चिन्ता, ब्रह्मविदामपि केषाञ्चित् इतिहासपुराणयोर्देहान्तरोत्पत्तिदर्शनात्। तथा ह्यपान्तरतमानाम वेदाचार्य्यः पुराणर्षिर्विष्णुनियोगात् कलिद्वापरयोः सन्धौ कृष्णद्वैपायनः सम्बभूवेति स्मरणं, वशिष्ठश्च ब्रह्मणो मानसः पुत्रः सन्निमिशापादपगतपूर्वदेहः पुनर्ब्रह्मादेशात् मित्रावरुणाभ्यां सम्बभूवेति। भृग्वादीनामपि ब्रह्मण एव मानसानां पुत्राणां वरुणे यज्ञे पुनरुत्पत्तिः स्मर्यते। सनत्कुमारोऽपि ब्रह्मण एव मानसः पुत्रः स्वयं रुद्राय वरप्रदानात् स्कन्दत्वेन प्रादुर्बभूव। एवमेव दक्षनारदप्रभृतीनामपि भूयसी देहान्तरोत्पत्तिकथा तेन तेन निमित्तेन भवति स्मृतौ श्रुतावपि मन्त्रार्थवादयोः प्रायेणोपलभ्यते। ते च केचित् पतिते पूर्वदेहे देहान्तरमाददते केचित्तु स्थित एव तस्मिन् योगैश्वर्यवशादनेकदेहागमन्यायेन, सर्वे चैते समधिगतसकलवेदार्थाः स्मर्य्यन्ते। तदेतेषां देहान्तरोत्पत्तिदर्शनात् प्राप्तं ब्रह्मविद्यायाः पाक्षिकं मोक्षहेतुत्वमहेतुत्वं वेत्यत उत्तरमुच्यते। न, तेषामपान्तरतमःप्रभृतीनां वेदप्रवर्त्तनादिषु लोकस्थितिहेतुष्वधिकारेषु नियुक्तानां अधिकारतन्त्रत्वात् स्थितेः। यथासौ भगवान् सविता सहस्रयुगपर्य्यन्तं जगतोऽधिकारं चरित्वा तदवसाने उदयास्तमयवर्जितं कैवल्यमनुभवति, "अथ तत ऊर्द्ध्व उदेत्य नैवोदेता नास्तमेतैकल एव मध्ये स्थाता" इति श्रुतेः। यथा च वर्त्तमाना ब्रह्मविदः प्रारब्धभोगक्षये कैवल्यमनुभवन्ति "तस्य तावदेव चिरं यावत् न विमोक्ष्येऽथ सम्पत्स्ये" इति श्रुतेः। एवमपान्तरतमःप्रभृतयोऽपीश्वराः परमेश्वरेण तेषु तेष्वधिकारेषु नियुक्ताः सन्तः सत्यपि सम्यग्दर्शने कैवल्यहेतावक्षीणकर्माणो यावदधिकारमवतिष्ठन्ते तदवसाने चापवृज्यन्त इत्यविरुद्धम्। सकृत्प्रवृत्तमेव हि तेऽधिकारफलदानाय कर्माशयमतिवाहयन्तः स्वातन्त्र्येण गृहादिव गृहान्तरमन्यमन्यं देहं सञ्चरन्तः स्वाधिकारनिर्वर्त्तनायापरिमुषितस्मृतय एव देहेन्द्रियप्रकृतिवशित्वात् निर्म्माय देहान् युगपत्क्रमेण वाधितिष्ठन्ति। न चैते जातिस्मरा इत्युच्यते, त एव ते, इति स्मृतिप्रसिद्धेः। यथा "सुलभा ब्रह्मवादिनी जनकेन विवदितुकामा व्युदस्य स्वं देहं जानकं देहमाविश्य व्युह्य तेन पश्चात् स्वमाविवेश" इति स्मर्यते। यदि ह्युपयुक्ते सकृत्प्रवृत्ते कर्मणि कर्म्मान्तरं देहान्तरारम्भकारणमाविर्भवेत् ततोऽन्यदप्यदग्धबीजं कर्म्मान्तरं तद्वदेव प्रसज्येतेति ब्रह्मविद्यायाः पाक्षिकं मोक्षहेतुत्वमहेतुत्वं वा शङ्क्येत, न त्वियमाशङ्का युक्ता ज्ञानात् कर्मबीजदाहस्य श्रुतिस्मृतिप्रसिद्धत्वात्। तथा च श्रुतिः— "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे" इति "स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः। इति चैवमाद्या। स्मृतिरपि 'यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्जुन!। ज्ञानाग्निः सर्वकर्म्माणि भस्मसात् कुरुते तथा'। इति- "बीजान्यग्न्युपदग्धानि न रोहन्ति यथा पुनः। ज्ञानदग्धैस्तथा क्लेशैर्नात्मा सम्पद्यते पुनः" इति—चैवमाद्या। न चाविद्यादिक्लेशदाहे सति क्लेशबीजस्य कर्म्माशयस्यैकदेशदाह एकदेशप्ररोहश्चेत्युपपद्यते, न